DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

ADVANCED SANSKRIT
PART 3

# WEEK FOUR

# DIAMOND MOUNTAIN UNIVERSITY

Advanced Sanskrit, 3
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

## Spring Term, Class Schedule

**WEEK FOUR: Thursday, May 17, 2007 1:00 – 4:00 PM**

A. Quiz covering intensives in Whitney
B. Review of outlines of grammar
C. Review of Sanskrit prayers
D. Review of Arya Nagarjuna's मूलमध्यमककारिका, chapter 16.

**HOMEWORK:**

1. Study Chapter XV in Whitney ("Periphrastic and Compound Conjugation").
2. Translate Chapter 7 of Arya Nagarjuna's मूलमध्यमककारिका. Provide a word by word English translation. In addition, identify for each word what grammatical part of speech it is. If it's a noun, identify its gender, case, and number (e.g., सद्भूतः, masculine, nominative, singular). If it's a verb, identify its verbal root, tense, voice, person and number (e.g. करोति, third person singular, present parasmaipadi, active, from the root कृ).

### संस्कृतपरीक्षा सप्तमं प्रकरणम्

यदि संस्कृत उत्पादस्तत्र युक्ता त्रिलक्षणी ।
अथासंस्कृत उत्पादः कथं संस्कृतलक्षणं ॥१ ॥

उत्पादाद्यास्त्रयो व्यस्ता नालं लक्षणकर्मणि ।
संस्कृतस्य समस्ताः स्युरेकत्र कथमेकदा ॥२ ॥

उत्पादस्थितिभङ्गानामन्यत्संस्कृतलक्षणं ।
अस्ति चेदनवस्थैवं नास्ति चेत्ते न संस्कृताः ॥३ ॥

उत्पादोत्पाद उत्पादो मूलोत्पादस्य केवलं ।
उत्पादोत्पादमुत्पादो मौलो जनयते पुनः ॥४ ॥

उत्पादोत्पाद उत्पादो मूलोत्पादस्य ते यदि ।
मौलेनाजनितस्तं ते स कथं जनयिष्यति ॥५ ॥

स ते मौलेन जनितो मौलम् जनयते यदि ।
मौलः स तेनाजनितस्तमुत्पादयते कथम् ॥६ ॥

अयमुत्पद्यमानस्ते काममुत्पादयेदिमं ।
यदीममुत्पादयितुमजातः शक्नुयादयं ॥७ ॥

प्रदीपः स्वपरात्मानौ संप्रकाशयिता यथा ।
उत्पादः स्वपरात्मानावुभावुत्पादयेत्तथा ॥८

प्रदीपे नान्धकारो ऽस्ति यत्र चासौ प्रतिष्ठितः ।
किं प्रकाशयति दीपः प्रकाशो हि तमोवधः ॥९

कथमुत्पद्यमानेन प्रदीपेन तमो हतं ।
नोत्पद्यमानो हि तमः प्रदीपः प्राप्नुते यदा ॥१०

अप्राप्यैव प्रदीपेन यदि वा निहतं तमः ।
इहस्थः सर्वलोकस्थं स तमो निहनिष्यति ॥११

प्रदीपः स्वपरात्मानौ संप्रकाशयते यदि ।
तमोऽपि स्वपरात्मानौ छादयिष्यत्यसंशयं ॥१२

अनुत्पन्नोऽयमुत्पादः स्वात्मानं जनयेत्कथं ।
अथोत्पन्नो जनयते जाते किं जन्यते पुनः ॥१३

नोत्पद्यमानं नोत्पन्नं नानुत्पन्नं कथं चन ।
उत्पद्यते तथाख्यातं गम्यमानगतागतैः ॥१४

उत्पद्यमानमुत्पत्ताविदं न क्रमते यदा ।
कथमुत्पद्यमानं तु प्रतीत्योत्पत्तिमुच्यते ॥१५

प्रतीत्य यद्यद्भवति तत्तच्छान्तं स्वभावतः।
तस्मादुत्पद्यमानं च शान्तमुत्पत्तिरेव च॥१६

यदि कश्चिदनुत्पन्नो भावः संविद्यते क्व चित्।
उत्पद्येत स किं तस्मिन्भाव उत्पद्यतेऽसति॥१७

उत्पद्यमानमुत्पादो यदि चोत्पादयत्ययं।
उत्पादयेत्तमुत्पादमुत्पादः कतमः पुनः॥१८

अन्य उत्पादयत्येनं यद्युत्पादोऽनवस्थितिः।
अथानुत्पाद उत्पन्नः सर्वमुत्पद्यते तथा॥१९

सतश्च तावदुत्पत्तिरसतश्च न युज्यते।
न सतश्चासतश्चेति पूर्वमेवोपपादितं॥२०

निरुध्यमानस्योत्पत्तिर्न भावस्योपपद्यते।
यश्चानिरुध्यमानस्तु स भावो नोपपद्यते॥२१

न स्थितभावस्तिष्ठत्यस्थितभावो न तिष्ठति।
न तिष्ठति तिष्ठमानः कोऽनुत्पन्नश्च तिष्ठति॥२२

स्थितिर्निरुध्यमानस्य न भावस्योपपद्यते ।
यश्चानिरुध्यमानस्तु स भावो नोपपद्यते ॥२३

जरामरणधर्मेषु सर्वभावेषु सर्वदा ।
तिष्ठन्ति कतमे भावा ये जरामरणं विना ॥२४

स्थित्यान्यया स्थितेः स्थानं तयैव च न युज्यते ।
उत्पादस्य यथोत्पादो नात्मना न परात्मना ॥२५

निरुध्यते नानिरुद्धं न निरुद्धं निरुध्यते ।
तथापि निरुध्यमानं किमजातं निरुध्यते ॥२६

स्थितस्य तावद्भावस्य निरोधो नोपपद्यते ।
नास्थितस्यापि भावस्य निरोध उपपद्यते ॥२७

तयैवावस्थयावस्था न हि सैव निरुध्यते ।
अन्ययावस्थयावस्था न चान्यैव निरुध्यते ॥२८

यदैवं सर्वधर्माणामुत्पादो नोपपद्यते ।
तदैवं सर्वधर्माणां निरोधो नोपपद्यते ॥२९

सतश्च तावद्भावस्य निरोधो नोपपद्यते ।
एकत्वे न हि भावश्च नाभावश्चोपपद्यते ॥३०

असतोऽपि न भावस्य निरोध उपपद्यते ।
न द्वितीयस्य शिरस च्छेदनं विद्यते यथा ॥३१

न स्वात्मना निरोधोऽस्ति निरोधो न परात्मना ।
उत्पादस्य यथोत्पादो नात्मना न परात्मना ॥३२

उत्पादस्थितिभङ्गानामसिद्धेर्नास्ति संस्कृतं ।
संस्कृतस्याप्रसिद्धौ च कथं सेत्स्यत्यसंस्कृतं ॥३३

यथा माया यथा स्वप्नो गन्धर्वनगरं यथा ।
तथोत्पादस्तथा स्थानंतथा भङ्ग उदाहृतं ॥३४